BG Ch 2 V 20

कथमविक्रिय आत्मेति द्वितीयो मन्त्रः

kathamavikriya ātmeti dvitīyo mantraḥ

न जायते म्रियते वा कदाचि-

न्नायं भूत्वाभविता वा न भूयः।

अजो नित्यः शाश्वतोऽयं पुराणो

न हन्यते हन्यमाने शरीरे ॥ २० ॥

na jāyate mriyate vā kadāci
nnāyaṁ bhūtvābhavitā vā na bhūyaḥ ।
ajo nityaḥ śāśvato'yaṁ purāṇo
na hanyate hanyamāne śarīre ।। 10 ।।

न जायते नोत्पद्यते जनिलक्षणा वस्तुविक्रिया नात्मनो विद्यते इत्यर्थः। तथा न म्रियते वा। वाशब्दश्चार्थे। न म्रियते चेत्यन्त्या विनाशलक्षणा विक्रिया प्रतिषध्यते।

na jāyate notpadyate janilakṣaṇā vastuvikriyā nātmano vidyate ityarthaḥ । tathā na mriyate vā । vāśabdaścārthe । na mriyate cetyantyā vināśalakṣaṇā vikriyā pratiṣadhyate ।

कदाचिच्छब्दः सर्वविक्रियाप्रतिषेधैः संबध्यते न कदाचिज्जायते न कदाचिन्म्रियते इत्येवम्। यस्मादयमात्मा भूत्वा भवनक्रियामनुभूय पश्चादभविताभावं गन्ता न भूयः पुनः तस्मान्न म्रियते।

kadācicchabdaḥ sarvavikriyāpratiṣedhaiḥ sambadhyate na kadācijjāyate na kadācinmriyate ityevam । yasmādayamātmā bhūtvā bhavanakriyāmanubhūya paścādabhavitābhāvaṁ gantā na bhūyaḥ punaḥ tasmānna mriyate ।

यो हि भूत्वा न भविता स म्रियते इत्युच्यते लोके।
वाशब्दान्नशब्दाच्चायमात्माभूत्वा वा भविता देहवन्न भूयः। तस्मान्न जायते। यो ह्यभूत्वा भविता स जायत इत्युच्यते। नैवमात्मा। अतो न जायते।

yo hi bhūtvā na bhavitā sa mriyate ityucyate loke |
vāśabdānnaśabdāccāyamātmābhūtvā vā bhavitā dehavanna bhūyaḥ | tasmānna jāyate | yo hyabhūtvā bhavitā sa jāyata ityucyate | naivamātmā |

यस्मादेवं तस्मादजो यस्मान्न म्रियते तस्मान्नित्यश्च। यद्यपि आद्यन्तयोर्विक्रिययोः प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवन्ति तथापि मध्यभाविनीनां विक्रियाणां स्वशब्दैरेव प्रतिषेधः कर्तव्योऽनुक्तानामपि यौवनादिसमस्तविक्रियाणां प्रतिषेधो यथा स्यादित्याह शाश्वत इत्यादिना।

yasmādevaṁ tasmādajo yasmānna mriyate tasmānnityaśca | yadyapi ādyantayorvikriyayoḥ pratiṣedhe sarvā vikriyāḥ pratiṣiddhā bhavanti tathāpi madhyabhāvinīnāṁ vikriyāṇāṁ svaśabdaireva pratiṣedhaḥ kartavyo'nuktānāmapi yauvanādisamastavikriyāṇāṁ pratiṣedho yathā syādityāha śāśvata ityādinā |

शाश्वत इत्यपक्षयलक्षणा विक्रिया प्रतिषिध्यते। शश्वद्भवः शाश्वतः। नापक्षीयते स्वरूपेण निरवयवत्वात्। नापि गुणक्षयेणापक्षयो निर्गुणत्वात्।

śāśvata ityapakṣayalakṣaṇā vikriyā pratiṣidhyate | śaśvadbhavaḥ śāśvataḥ | nāpakṣīyate svarūpeṇa niravayavatvāt | nāpi guṇakṣayeṇāpakṣayo nirguṇatvāt |

अपक्षयविपरीतापि वृद्धिलक्षणा विक्रिया प्रतिषिध्यते पुराण इति । यो ह्यवयवागमेनोपचीयते स वर्धते अभिनव इति चोच्यते ।

apakṣayaviparītāpi vṛddhilakṣaṇā vikriyā pratiṣidhyate purāṇa iti । yo hyavayavāgamenopacīyate sa vardhate abhinava iti cocyate।

अयं त्वात्मा निरवयवत्वात्पुरापि नव एवेति पुराणो न वर्धते इत्यर्थः । तथा न हन्यते । हन्तिरत्र विपरिणामार्थे द्रष्टव्योऽपुनरुक्ततायै ।

ayaṁ tvātmā niravayavatvātpurāpi nava eveti purāṇo na vardhate ityarthaḥ । tathā na hanyate । hantiratra vipariṇāmārthe draṣṭavyo'punaruktatāyai ।

न विपरिणम्यते इत्यर्थः । हन्यमाने विपरिणम्यमानेऽपि शरीरे । अस्मिन्मन्त्रे षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यन्ते । सर्वप्रकारक्रियारहित आत्मा इति वाक्यार्थः । यस्मादेवं तस्मादुभौ तौ न विजानितरिति पूर्वेण मन्त्रेणास्य संबन्धः ॥ २० ॥

na vipariṇamyate ityarthaḥ । hanyamāne vipariṇamyamāne'pi śarīre । asminmantre ṣaḍbhāvavikārā laukikavastuvikriyā ātmani pratiṣidhyante । sarvaprakārakriyārahita ātmā iti vākyārthaḥ । yasmādevaṁ tasmādubhau tau na vijānitariti pūrveṇa mantreṇāsya sambandhaḥ ।। 20 ।।